# <u>इन्द्रियाणामापेक्षया मन-बुद्धि-आत्मानां श्रेष्ठत्वं प्रतिपादयत।</u>

## <u>भूमिका –</u>

विषयं प्रति यदि वासना तिष्ठति तर्हि आत्मज्ञानस्य उदयः न भवति। यथा धूमस्य अपसारणं भवति चेत् अग्नेः प्रकाशो भवति, धूलिकणायाः अपसारणं भवति तदा दर्पणं अतीवा स्वच्छा प्रतीयते। मूत्रेण जरायुः प्रसारितः भवति चेत् भ्रूणस्य प्रकाशः भवति, तथैव विषयस्य वासना अपगच्छति चेत् आत्मज्ञानस्य साक्षात् उदयो भवति। इन्द्रिय-मन-बुद्धिः इति एते त्रयः भवन्ति कामनावासनायाः आश्रयभूताः। कामस्तु मनः आश्रित्य बहुविधानां सुखानां कल्पनां करोति, बुद्धिम् आश्रित्य निश्चयं करोति, श्रोत्रादीनि ज्ञानेन्दियाणि आश्रित्य विरुद्धं कर्म करोति। एतानि इन्द्रियाणि पुरुषं प्रति प्रलिप्य मोहाच्छन्नं कुर्वन्ति। तस्य आत्मज्ञानस्य स्फुर्तिः न भवति। एतेषु कः श्रेष्ठः इति ज्ञातव्यः। यतो हि श्रेष्ठम् आत्मानं ज्ञात्वा चित्तं निवेशयति चेद् एव कामनावासनाविषयभोगाच्छान् विनाशयितुं शक्नोति।

## <u>इन्द्रियस्य प्रयोजनम् –</u>

देहपतिः जीवः यदा कस्मादपि शरीरात् निर्गत्य शरीरान्तरं प्रवेशति, तदा वायुः यथा गन्धस्य आधारात् पुष्पात् गन्धं वहति तथैव सूक्ष्मदेहरूपी जीवात्मा अपि इन्द्रियगणैः सह गच्छति। सुवासितस्य पुष्पस्य इव यदि गन्धः सुगन्धः भवति, तस्मात् इन्द्रियाणि साधुशरीरं प्रति

गच्छन्ति, एवञ्च यदि सोऽयं गन्धः यदि दुर्गन्धयुक्तः भवति तर्हि इन्द्रियाणि असाधुशरीरं प्रति गच्छन्ति। इन्द्रियाणां प्रयोजनविषये गीतायाम् उक्तम् अस्ति –

श्रोत्रञ्चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च।

अधिष्ठाय मनश्चायं विषयानुपसेवते॥

<u>इन्द्रियादीनां जीवात्मनां प्रति आकर्षणम् –</u>

मन इति शब्दः अन्तःकरणवाचकः। इदं मनः यदा चक्षु-कर्ण-नासिका-जिह्वा-त्वक् इति पञ्च ज्ञानेन्द्रियाणि आकर्षणं करोति तदा प्राणेन एव आकर्षणं भवति। कर्मेन्द्रियाणि ज्ञानेन्द्रियाणाम् अधीने तिष्ठन्ति अपि च प्रकृतेः कार्यरूपस्य शरीरस्य क्रियाकलापं संसाधितं करोति। प्रकृतौ स्थितानि कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि इव संवाहितानि भवन्ति जीवात्मना। तस्मात् गीतायाम् उक्तमस्ति –

ममैवांशो जीवलोके जीवभूतः सनातनः।

मनः षष्ठानीनन्द्रियाणि प्रकृतिस्थानि कर्षति॥

संयाम्यता – इन्द्रियाणाम् अनुकूलविषये अनुरागः अपि च प्रतिकूलविषये विद्वेष अवश्यम्भावी। रागद्वेषैः वशीभूत्वा इन्द्रियाणि विपथि चालयित्वा अनिष्टं साध्यते। कामना भवति सर्वस्य

अनर्थस्य मूला। कामना भवति दुष्पूरणीया दुर्जया च, श्रेयमार्गस्य परमः शत्रुः। इन्द्रिय-मन-बुद्धि इति कामनायाः अधिष्ठानभूमिः। तस्मात् बुद्धौ अधिष्ठितस्य परमात्मनः विषये सचेतनता आवश्यकी। इन्द्रियाणि संयमपूर्वकम् आत्मानम् आत्मज्ञानप्रयोगे निश्चलं कुर्वन्ति, आत्मनिष्ठो भूत्वा परमेश्वरे मनः समाहितं करोति। तस्मात् गीतायाम् उक्तमस्ति –

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मनमात्मना।

जहि शत्रुं महावाहो कामरूपं दुरासदम्॥

श्रेष्ठत्वविचारः – इन्द्रियाणि श्रेष्ठानि, इन्द्रियाणाम् अपेक्षा मनस्तु श्रेष्ठम्। परन्तु इन्दियेभ्यः कः श्रेष्ठः। उत्तरे वक्तुम् इदं शक्यते यत् स्थूलशरीरात्। किमर्थं श्रेष्ठः। यतो हि इन्द्रियाणि सूक्ष्मप्रकाशकानि अपि च देहादिनां परिचालकानि। मनस्तु अन्तरिन्द्रियम् इति कथ्यते। तस्मात् मनः बहिस्तात् इन्द्रियात् श्रेष्ठम्। बुद्धिस्तु मनसः परिचालनं करोति तस्मात् बुद्धिः मनसः श्रेष्ठा। सर्वोपरि यस्तु बुद्धेः श्रेष्ठः सः साक्षीरूपेण सर्वस्य अन्तरे तिष्ठति स आत्मा। तस्मात् गीतायाम् उक्तमस्ति –

इन्द्रियाणि परान्याहुरिन्द्रियेभ्यः परं मनः।

मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥

**<u>मनर्बुद्धियोः श्रेष्ठत्वम् –</u>**

दर्शनश्रवणादिनां ज्ञानं तु बाह्यविषयाणां ज्ञानम्। तस्मात् पञ्च ज्ञानेन्द्रियाणि तु बहिःकरणानि। सुखदुःखादयस्तु आन्तरपदार्थाः अपि च यैः सुखदुःखादयः ज्ञायन्ते तदेव अन्तःकरणम्। इदम् अन्तःकरणमेव मनः। वस्तुतः अन्तःकरणस्य बहुविधाः क्रियाः तिष्ठन्ति यथा संशयः, निश्चयः, गर्वः, स्मरणम् इत्यादयः। अन्तःकरणेन वयं संशयं कुर्मः तत् वा एतत् इत्यनेन रूपेण संकल्पविकल्पं कुर्मः तदैव अन्तःकरणं मनः नाम्ना अभिधीयते। वेदान्तसारे उक्तमस्ति –

मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः।

पुनश्च बहुषु विकल्पेषु एकं विकल्पं निश्चिनोति तदा अन्तःकरणम् बुद्धिः इत्युच्यते। तस्मात् सदानन्दयोगीन्द्रः उक्तवान् – बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। बुद्धिशब्दः नानार्थे व्यवहृतो भवति। मूलतया बोधः ज्ञानार्थे वा बुद्धिशब्दस्य प्रयोगो भवति सर्वदा। दार्शनिकपरिभाषायां बुद्धिस्तु व्यवसायात्मिका वा निश्चयात्मिका मनो बृत्तिः उच्यते। विषयसहितेन इन्द्रियसंयोगेन मनसि बहुविधाः संस्काराः जायन्ते। तदा बुद्धिः विचारयति किं ग्रह्यम् उत किम् अग्रह्यमिति। तस्मात् इन्द्रियापेक्षया यथा मनः श्रेष्ठं तथैव मनसः अपेक्षया बुद्धिः श्रेष्ठा। कठोपनिषदि रथोरूपकस्य दृष्टान्ते उक्तमस्ति –

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।

बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।

गीतायाम् अपि शरीरम् – इन्द्रियम्- मनः- बुद्धि- आत्मा अनेन क्रमेन गीतायां श्रेष्ठं वर्णितम् अस्ति। पाश्चात्यः जार्मानः तत्त्वविद् कान्ट उक्तवान् –the moral worth of an action cannot be anywhere but in the principle of the will, without regard in the ends which can be attained by action.

अनया बुद्ध्या एव आत्मग्रहणं भवितुम् अर्हति। मनसः अपेक्षा बुद्धिः अतीवा आन्तरा प्रत्यगात्मभूता वा। मनसः यत्र स्थगनं भवति तदतिरिच्य अग्रे गन्तुं न शक्नोति, तस्मात् स्थानात् बुद्धेः आरम्भः भवति। बुद्धिः एव एका उपकारका। तस्मात् हेतोः एव बुद्धिः मनसः अपेक्षा व्यापकतरा इति कथ्यते।

<u>आत्मनः श्रेष्ठत्वम् –</u>

इन्द्रियाणां संयमेव मुख्यं भवति। इन्द्रियाणां संयमं यदि कर्तुं शक्नोति तदैव मनुष्यः तेजस्वी भवति। बुद्धिस्तु कामस्य आश्रयभूता, विषयेन्द्रियाणां संस्रावे तु विकारप्राप्ता भवति। परन्तु

आत्मा निर्विकारः। जगतः सर्वस्य साक्षीस्वरूपः, तस्मादेव अयम् आत्मा बुद्धेः अपेक्षा श्रेष्ठः।

कठोपनिषदि उक्तम् अस्ति –

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।

मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥

तस्मात् कर्णादिभ्यः इन्द्रियेभ्यः तेषां विषयाः श्रेष्ठाः। एतेभ्यः विषयेभ्यः मनः श्रेष्ठम्, मनसः तु बुद्धिः श्रेष्ठा। बुद्धेः सर्वस्य जीवस्य समष्टिबुद्धिरूपः महान् आत्मा श्रेष्ठः। सर्वस्य जगतः बीजभूता अव्यक्ता प्रकृतिः महतः आत्मनः श्रेष्ठा। अस्याः अव्यक्तायाः प्रकृतेः परमात्मा श्रेष्ठः। परमात्मनः श्रेष्ठम् अन्यत् किमपि नास्ति। सः एव सूक्ष्मत्वस्य महत्त्वस्य आत्मत्वस्य चरमः भावः। तस्मात् एव उपनिषदः मुख्या वाणी भवति – सा काष्ठा सा परा गतिः।

**उपसंहारः –**

परमेश्वरैकं प्रति युक्तो भूत्वा तथा च परमात्मनि मतिं संस्थाप्य निश्चयात्मिकायां बुद्धौ नित्यनैमित्तिकभावेन अवश्यकर्माणि सदा व्यापृतो तिष्ठति तदैव निश्चयात्मिकया बुध्या मनसं समाहितं कर्तुं शक्नोति। मनस्तु तदा प्राकृतविषये अविनिष्टं स्थित्वा चञ्चलतां परित्यज्य

भगवद्भावनायां नियुक्तं भवति। अनेन प्रकारेण सर्वकामनां वर्जनपुरःसरं साम्यबुद्धिं लभ्य जीवः मोक्षं प्राप्स्यति।